417

श्रीः ।

शिवहरराजधानीपति-

श्रीराजादेवनन्दनसिंहबहादूरनराधिप-

संगृहीतविरचित-

शाक्तप्रमोदान्तर्गतं

त्रयोदशं

दुर्गातन्त्रम ।

उक्तराजगुरुवंश्यपण्डितश्रीरघुराज-

दुबेजीद्वारा संशोधितम् ।

तदेतत्

खेमराज श्रीकृष्णदासश्रेष्ठिना

मुम्बय्यां

स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रागारे

मुद्रयित्वा प्रकाशितम् ।

तृतीयावृत्तिः ।

अस्य ग्रन्थस्य पुनर्मुद्रणाद्यधिकाराः १८६७ वार्षिक २५ तमराज

नियमानुरोधेन प्रकाशकाधीनाः सन्ति ।

आर्तध्यानम्

श्रीगणेशाय नमः ।

अथ शाक्तप्रमोदः ।

अथ दुर्गातन्त्रम् ।

अथदुर्गाध्यानम् ।

सिंहस्कन्धसमारूढान्नानालङ्कारभूषिताम् ॥ चतुर्भुजाम्महादेवीन्नागयज्ञोपवीतिनीम् ॥ रक्तवस्त्रपरीधानाम्बालार्कसदृशीतनुम् ॥ नारदाद्यैर्म्मुनिगणैःसेविताम्भवगेहिनीम् ॥ त्रिवलीवलयोपेतनाभिनालसुवेशिनीम् ॥ रत्नद्वीपेमहाद्वीपेसिंहासनसमन्विते ॥ प्रफुल्लकमलारूढान्ध्यायेत्ताम्भवगेहिनीम् ॥



अथयन्त्रोद्धारः ।

दुर्ग्गायन्त्रम्प्रवक्ष्यामिशृणुष्वहरवल्लभे ॥ त्रिकोणंविन्यसेत्पूर्व्वन्नवकोणसमन्वितम् ॥ त्रैबिम्बसहितंसर्व्वमष्टपत्रसमन्वितम् ॥ त्रिरेखासहितंवज्रम्भूपुरद्वयसँय्युतम् ॥ समीकृत्यययथोक्तेनविलिखेद्विधिनामुना ॥ नानास्त्रसँय्युतँल्लेख्यञ्चक्रम्मन्त्रविभूषितम् ॥ तत्रताम्पूजयेद्देवीम्मूलप्रकृतिरूपिणीम् ॥



अथमन्त्रोद्धारः ।

अथदुर्ग्गामनुर्व्वक्ष्येदृष्टादृष्टफलप्रदम् ॥मायादि२कर्ण्णविद्धाढचोभूयोसौसर्ग्गवान्भवेत् ॥ चान्तकश्चप्रतिष्ठावान्मारुतोभौतिकासनः ॥ तारादिर्हृदयान्तोयम्मन्त्रोवस्वक्षरात्मकः ॥

अथमन्त्रः ।

ॐह्रींदुन्दुर्गायैनमः ।

अथपूजाविधिः ।

प्रात२कृत्यादिपीठन्यासान्तँव्विधाय केसरेषुमध्येचपीठशक्तीर्व्विन्यसेत् ॥ तद्यथा ॥ आंप्रभायैनमः । ईमायायैनमः ॥ ऊंजयायैनमः ऋँ सूक्ष्मायैनमः ऌँविशुद्धायैनमः ॥ ऐंनन्दिन्यैनमः॥ औंसुप्रभायैनमः अंविजयायैनमः अःसर्व्वसिद्धिदायैनमः॥तदुपरि ॥ ॐवज्रनखदंष्ट्रायुधाय महासिंहासनायहूंफट्नम इतिपूज

येत्॥ततऋष्यादिन्यासः ॥ शिरसिनारदऋषयेनमः ॥ मुखेगा यत्रीछन्दसेनमः ह्रदिदुर्ग्गादेवतायैनमः ततः करान्यासौ ह्रां ॐ ह्रीं दुन्दुर्ग्गायैअङ्गुष्ठाभ्यान्नमः ह्रीं ॐ ह्रीं दुन्दुर्ग्गायैतर्ज्जनीभ्यां स्वाहा ह्रूं ॐ ह्रीं दुन्दुर्ग्गायैमध्यमाभ्यांवषट् ह्रैं ॐ ह्रीं दुन्दुर्ग्गायैअना मिकाभ्यांहूम् ह्रौं ॐ ह्रीं दुन्दुर्ग्गायैकनिष्ठिकाभ्यांव्वौषट् ह्रः ॐ ह्रीं दुन्दुर्ग्गायैकरतलकरपृष्ठाभ्यांफट् ॥ एवंह्रदयादि॥ह्रां ॐ ह्रीं दुन्दु र्ग्गायैह्रदयायनमः ह्रीं ॐ ह्रीं दुन्दुर्ग्गायैशिरसेस्वाहा ह्रूं ॐ ह्रीं दुन्दु र्ग्गायैशिखायैवषट् ह्रैं ॐ ह्रीं दुन्दुर्ग्गायैनेत्रत्रयायवौषट् ॥ ह्रौं ॐ ह्रीं दुन्दुर्ग्गायैकवचायहूम् ह्रः ॐ ह्रीं दुन्दुर्ग्गायैअस्त्रायफडितिषड ङ्गादिन्यासः॥तथाचनिवन्धे ।नमस्कारनियुक्तेनमूलमन्त्रेणदेशि कः ॥ ह्रीमाद्यैःसहकुर्वीतषडङ्गानियथाविधि ॥ अथध्यानम् ॥ सिंहस्थाशशिशेखरामरकतप्रख्यैश्चतुर्भिर्भुजैः शङ्खञ्चक्रधनुःश रांश्चदधतीनेत्रैस्त्रिभिश्शोभिता ॥ आमुक्ताङ्गदहारकङ्कणरण त्काञ्चीक्वणन्नूपुरा दुर्ग्गादुर्ग्गतिहारिणीभवतुनोरत्नोल्लसत्कुण्ड ला ॥ एवन्ध्यात्वा मानसैः शङ्खस्थापनङ्कुर्य्यात् ॥ ततः पीठ पूजाङ्कुर्य्यात् ॥ केसरेषुमध्येच आंप्रभायैनमः ईंमायायै नमःऊंजयायैनमः ऋंसूक्ष्मायैनमः ॡंविशुद्धायैनमःॐऐंनन्दि न्यैनमः ॥ औंसुप्रभायैनमः ॥अंविजयायैनमः॥अःसर्व्वसिद्धिदा यैनमः ॥ तदुपरिवज्रनखदंष्ट्रायुधायमहासिंहासनायहूम्फट्नमः॥ दद्यादासनमेतेनमूर्त्तिंमूलेनकल्पयेत् ॥ ततःपुनर्द्धर्य्यात्वावाहना दिपञ्चपुष्पाञ्जलिदानपर्य्यन्तंविधायावरणपूजामारभेत ॥ अ ग्निनैर्ऋतिवाय्वीशानकोणमध्येदिक्षुच ॥ ह्रांॐ ह्रीं दुन्दुर्ग्गायैह्रद यायनमः॥इत्यादिनापूजयेत् ॥ ततःपत्रेपुपूर्व्वादि॥जंजयायै० विं विजयायै० किंकीर्त्यै० पंप्रीत्यैनमःपंप्रभायै० शुंशुद्धायै० मंमेधायै शंश्रुत्यै० ॥ पत्राग्रेषुलंखड्गायनमःवंखेटकायनमःशंबाणायनमः

धंधनुषेनमः संशूलाय० हंतर्ज्जन्यै० तद्वहिरिन्द्रादिवज्रादींश्चपूज येत् ॥ ततोधूपादिविसर्ज्जनान्तङ्कर्म्मसमापयेत् ॥ अस्याबलि मन्त्रस्तु ॥ एहिएहिपदद्वन्द्वम्मदीयञ्चबलिन्देविलायकपदद्वयं साधयद्वितीयम्ब्रूयात्खादयद्वितीयम्पुनः ॥ सर्व्वसिद्धिपदन्देवीत तःस्वाहापदम्भवेत् ॥ बलिदानस्यमन्त्रोयंमन्त्रिण्यापारिकीर्त्तितः ॥ अस्यपुरश्चरणमष्टलक्षः ॥ अष्टसहस्रतिलैर्होमः ॥ तथा च ॥ वसुलक्षंजपेन्मन्त्रंतत्सहस्रतिलैःसह इत्यादिवचनात् ॥

अथ स्तोत्रम् ।

नमन्त्रन्नोयन्त्रन्तदपिचनजानेस्तुतिमहो नचाह्वानन्ध्यान न्तदपिचनजानेस्तुतिकथाः ॥ नजानेमुद्रास्तेतदपिचनजा नेविलपनम्परञ्चानेमातस्त्वदनुशरणङ्क्लेशहरणम् ॥ १ ॥ विधेरज्ञानेन द्रविणविरहेणाऽलसतया विधेयाशक्यत्वात्तवचर णयोर्य्याच्युतिरभूत्॥तदेतत्क्षन्तव्यञ्जननिसकलोद्धारिणिशिवे कुपुत्रोजायेतक्वचिदपिकुमातानभवति ॥ २ ॥ पृथिव्याम्पु त्रास्तेजननिवहवःसन्तिसरलाः परन्तेषाम्मध्येविरलतरलोह न्तवसुतः ॥ मदीयोयन्त्यागः समुचितमिदन्नोतवशिवे कुपुत्रो जायेतक्वचिदपिकुमातानभवति ॥ ३ ॥ जगन्मातर्म्मातस्तवच रणसेवा नरचिता नवादत्तन्देविद्रविणमपिभूयस्तवमया ॥ तथाऽपित्वंस्नेहंमयिनिरुपमँय्यत्प्रकुरुषे कुपुत्रोजायेतक्वचिदपि कुमातानभवति ॥ ४ ॥ परित्यक्त्वादेवान्विविधाविधिसेवा कुलतया मयापञ्चाशीतेरधिकमुपनीतेतुवयसि ॥ इदानीञ्चेन्मा तस्तवयदिकृपानाऽपिभविता निरालम्बोलम्बोदरजननिकँय्या मिशरणम् ॥ ५ ॥ श्वपाकोजल्पाकोभवतिमधुपाकोपमगिरा निरातङ्कोरङ्कोविहरतिचिरङ्कोटिकनकैः ॥ तवापर्ण्णेकर्ण्णेविशति

मनुवर्ण्णेफलमिदञ्चनꣳकोजानीतेजननिजपनीयञ्चपविधौ ॥ ॥ ६ ॥ चिताभस्मालेपोगरलमशनन्दिक्पटधरोजटाधारीक ण्ठेभुजगपतिहारीपशुपतिः ॥ कपालीभूतेशोभजतिजगदीशै कपदवीम्भवानित्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥ ७ ॥ न मोक्षस्याकाङ्क्षानचविभववाञ्छापिचनमेनाविज्ञानापेक्षाशशिमु खिसुखेच्छापिनपुनः॥अतस्त्वांसꣳय्याचेजननिजननꣳय्यातुममवै मृडानीरुद्राणीशिवशिवभवानीतिजपतः ॥ ८ ॥ नाराधिता सिविधिनाविविधोपचारैꣳकिंरूक्षचिन्तनपरैर्न्नकृतव्वँचोभिः ॥ श्यामेत्वमेवयदिकिञ्चनमय्यनाथे धत्सेकृपामुचितमम्बपरन्तवै व ॥ ९ ॥ आपत्सुमग्नःस्मरणन्त्वदीयङ्करोमिदुर्गेंकरुणार्ण्णवे शि ॥ नैतच्छठत्वम्ममभावयेथाः क्षुधातृपार्त्तांजननींस्मरन्ति ॥ १० ॥ जगदम्वविचित्रमत्रकिम्परिपूर्ण्णाकरुणास्तिचेन्मयि॥ अपराधपरम्परावृतन्नहिमातासमुपेक्षतेसुतम् ॥ ११ ॥ मत्स मꣳपातकीनास्तिपापघ्नीत्वत्समानहि ॥ एवंज्ञात्वामहादेवियथा योग्यन्तथाकुरु ॥ १२ ॥ इतिस्तोत्रम् ॥

अथकवचम् ।

शृणुदेविप्रवक्ष्यामिकवचंसर्व्वसिद्धिदम् ॥ पठित्वापाठयित्वा चनरोमुच्येतसङ्कटात्॥ अज्ञात्वाकवचन्देविदुर्ग्गामन्त्रञ्चयोजपे त् ॥ सनाप्नोतिफलन्तस्यपरञ्चनरकम्व्रजेत् ॥ उमादेवीशिरःपा तुललाटेशूलधारिणी ॥चक्षुषीखेचरीपातुकर्ण्णौचत्वरवासिनी॥ सुगन्धानासिकेपातुवदनंसर्व्वधारिणी॥ जिह्वाञ्चचण्डिकादेवीग्री वांसौभद्रिकातथा ॥ अशोकवासिनीचेतोद्वौबाहूवज्रधारिणी॥हृ दयँल्ललितादेवीउदरंसिंहवाहिनी ॥ कटिम्भगवतीदेवीद्वावूरूवि न्ध्यवासिनी॥ महाबलाचजङ्घेद्रे पादौभूतलवासिनी॥एवंस्थिता

सिदेवित्वन्त्रैलोक्येरक्षणात्मिका ॥ रक्षमांसर्व्वगात्रेषुदुर्ग्गेदेवि नमोऽस्तुते ॥ इतिकवचम् ॥

अथोपनिषत् ।

सर्व्वेदेवादेवीमुपतस्थुः । कासित्वम्महादेवि । साब्रवीदहम्ब्रह्मस्वरूपिणी । मत्तःप्रकृतिपुरुषात्मकञ्जगत् । शून्यञ्चाशून्यञ्च अहमानन्दावानन्दौ । अहँव्विज्ञानाविज्ञाने । अहम्ब्रह्माणीवेदब्रह्मणिवेदितव्येइतिचाथर्व्वणीश्रुतिः ॥ अहम्पञ्चभूतानिअहंपञ्चतन्मात्राणि । अहमखिलञ्जगत् वेदोहमवेदोहम् विद्याहमविद्याहम्अजाहमनजाहम्अधश्चोर्द्ध्वञ्चतिर्य्यक्चाहम् । अहंरुद्रेभिर्व्वसुभिश्चरामिअहमादित्यैरुतविश्वेदेवैः ॥ अहम्मित्रावरुणावुभौबिभर्म्मिअहमिन्द्राग्नीअहमश्विनावुभौ ॥ अहंसोमन्त्वष्टारम्पूषणम्भगंसन्दधामि ॥ अहँव्विष्णुमुरुक्रमम्ब्रह्माणमुत्प्रजापतिन्दधामि ॥ द्रविणंहविष्मतेसुप्रजाययजमानायसुन्वते ॥ अहंराष्ट्री सङ्गमनीवसूनाञ्चिकितुषीप्रथमायज्ञियानाम्॥ अहंसुवेर्य्यःपितरमस्यमूर्द्धन्ममयोनिरप्स्वन्तः समुद्रे ॥ यएवं वेदसदेवीपदमाप्नोति तेदेवाअब्रुवन् ॥ नमोदेव्यैमहादेव्यैशिवायैसततन्नमः ॥ नमःप्रकृत्यैभद्रायैनियताःप्रणताःस्मताम् ॥ तामग्निवर्णान्तपसाज्वलन्तींव्वैरोचनीङ्कर्म्मफलमुपजुष्टाम् ॥ दुर्ग्गान्देवींशरणमहम्प्रपद्येसुतरांनाशयतेनमः ॥ देवीमम्वामजनयन्तदेवास्ताँव्विश्वरूपाःपशवोवदन्ति । सानोमन्द्रेषमूर्ज्जन्दुहानाधेनुर्व्वागस्मानुपसुष्टुतैतु ॥ कालरात्रींव्वापस्तुतानान्ताँव्वैष्णवींस्कन्दमातरंसरस्वतीमदितिन्दक्षदुहितरन्नमाम्यहंपावनांशिवाम् ॥ महालक्ष्म्यैचविद्महेसर्व्वशक्त्यैचधीमहि ॥ तन्नोदेवीप्रचोदयात् ॥ अदितिर्ह्यजनिष्टदक्षयादुहितातव ॥ तान्देवाअन्वजायन्तभ

द्राअमृतबन्धवः । कामेयोनिरकमलवेत्रपाणिगुहाहस्तामातरि श्वाशमिन्द्रःपुनर्गेहासफलामाययाचापृथुकेनविश्वमाताादिवि द्याएषात्माशक्तिः । एषाविश्वमोहिनी । पाशाङ्कुशधनुर्बाणधरा एषाश्रीमहाविद्यायएवंव्वेदसशोकन्तरतिनमस्ते भगवतिमातर स्मान्पाहिसर्व्वतः । सैषाष्टौवसवःसैषाएकादशरुद्राःसैषाद्वाद शादित्याःसैषाविश्वेदेवाःसोमपाअसोमपाश्चसैषायातुधानाअसु रारक्षांसिपिशाचायक्षसिद्धाःसैषासत्त्वरजस्तमांसिसैषाब्रह्मविष्णु रुद्ररूपिणीसैषाप्रजापतीन्द्रमनवःसैषाग्रहनक्षत्रज्योतींषिकला काष्ठादीतिरस्मरूपिणीतामहम्प्रणतोस्मि ॥ नित्यपापहारिणी देवीभुक्तिमुक्तिप्रदायिनी ॥ अनन्ताँव्विजयांशुद्धांशरण्यांशिव दांशुभाम् ॥ वियदाकारसंय्युक्तव्वींतिहोत्रसमन्वितम् ॥ अर्द्धेन्दु लसितन्देव्याबीजंसर्व्वार्त्थसाधकम् ॥एवमेकाक्षरम्मन्त्रङ्कतवःशु द्धचेतसः ॥ ध्यायन्तिपरमानन्दमयाज्ञानाम्बुराशयः ॥ वामा यान्नब्रह्मभूतस्मात्यष्टवक्त्रसमन्वितम् ॥ सूर्य्योवामश्रोत्रबिन्दुःसँ य्युक्ताष्टातृतीयकः ॥ नारायणेनसम्मित्रोसावाद्यश्चाधरयुक्त यः ॥ विधेनवार्ण्णकोणःस्यान्महानन्दप्रदायकः ॥ हृत्पुण्डरीक मध्यस्थाम्प्रातःसूर्य्यसमप्रभाम् ॥ पाशाङ्कुशधरांसौम्यवरदाभ यहस्तकाम् ॥ त्रिनेत्रांरक्तवसनाम्भक्तकामदुहाम्भजे ॥ भजा मित्वाम्महादेवीम्महाभयविनाशिनीम् ॥ महादारिद्र्यशमनीमहा रूपास्वरूपिणी ॥ यस्याःस्वरूपम्ब्रह्मादयोनजानन्तितस्मादु च्यतेअनन्ता । यस्यागृहन्नोपलक्ष्यतेतस्मादुच्यतेअलक्ष्यम् । यस्याजननन्नोपलभ्यतेतस्मादुच्यतेअजा । एकैवसर्व्वत्रवर्त्ततेतस्मादेका । एकैकविश्वरूपिणीतस्मादनेका । अनन्ततयोवाच्य ज्ञेयानन्तालक्ष्याजैकानेकानमन्त्राणाम्मातृकादेवीशब्दानांज्ञान रूपिणी ॥ ज्ञानानाञ्चिन्मयातीताशून्यानांशून्यसाक्षिणी ॥ य

स्या॒परतरन्नास्तिसैषादुर्ग्गाप्रकीर्त्तिता।तान्दुर्ग्गदुर्ग्गमान्देवीन्दु राचारविधायिनीम्॥ नमामिभवभीतोहंसंसारार्ण्णवतारिणीम्॥ यइदमथर्व्वशीर्ष्षंय्योधीतेसपञ्चाथर्व्वशीर्षफलमाप्नोतिइदमथर्व्व शीर्षमज्ञात्वायो अर्च्चांस्थापयतिशतलक्षञप्त्वानार्च्चांशुद्धिश्चवि न्दति । शतमष्टोत्तरञ्चास्यपुरश्चर्य्याविधिःस्मृतः । दशवार म्पठेद्यस्तुसद्य॒पापै॒प्रमुच्यते॥ महादुर्ग्गाणितरतिमहादेव्या॒ प्रसादतः ॥ सायमधीयानोदिवसकृतम्पापन्नाशयति । सा यम्प्रात॒प्रयुञ्जानोअपापोभवति । निशीथेतुरीयसन्ध्यायांवाज प्त्वावाक्सिद्धिर्भवति । नूतनायाम्प्रतिमासन्निधौजप्त्वादेवता सान्निध्यम्भवति । प्राणप्रतिष्ठायाञप्त्वादेवताभवति ॥ भौमा श्विन्याम्महादेवीसन्निधौजप्त्वामहामृत्युन्तरतिमहामृत्युन्तरति यएवँव्वेद ॥ इतिदेव्याअथर्व्वशीर्षोपनिषत्समाप्ता ॥

अथशतनामाष्टकम् !

॥ ईश्वर उवाच ॥ शतनामप्रवक्ष्यामिशृणुष्वकमलानने ॥ यस्यप्रसादमात्रेणदुर्ग्गाप्रीतासदाभवेत् ॥ १ ॥ सतीसाध्वीभव प्रीताभवानीभवमोचनी ॥ आर्य्यादुर्ग्गाजयाआद्यात्रिनेत्राशूल धारिणी ॥ २ ॥ पिनाकधारिणीचित्राचन्द्रघण्टामहातपा ॥ मनोबुद्धिरहङ्काराचित्तरूपाचिताचितिः ॥ ३ ॥ सर्व्वमन्त्रमयी सत्यासत्यानन्दस्वरूपिणी॥ अनन्ताभाविनीभाव्याभवाभव्या सदागतिः ॥४ ॥ शम्भुपत्नीदेवमाताचिन्तारत्नप्रियासदा ॥ सर्व्व विद्यादक्षकन्यादक्षयज्ञविनाशिनी ॥ ५ ॥ अपर्णाचैवपर्णाच पाटलापटलावती ॥ पट्टाम्बरपरीधानाकमलमञ्जीररञ्जिनी॥६॥ अमेयाविक्रमाक्रूरासुन्दरीकुलसुन्दरी ॥ वनदुर्ग्गाचमातङ्गीमत

ङ्गमुनिपूजिता ॥ ७ ॥ ब्राह्मीमाहेश्वरीचैन्द्रीकौमारीवैष्णवीत था ॥ चामुण्डाचैववाराहीलक्ष्मीश्चपुरुषाकृतिः ॥ ८ ॥ विम लोत्कर्षिणीज्ञानक्रियासत्याचवाक्प्रदा ॥ बहुलाबहुलप्रेमासर्व वाहनवाहना ॥ ९ ॥ निशुम्भशुम्भहननीमहिषासुरमर्द्दिनी ॥ मधुकैटभहन्त्रीचचण्डमुण्डविनाशिनी ॥ १० ॥ सर्वाऽसुरवि नाशाचसर्वदानवघातिनी ॥ सर्वशास्त्रमयीविद्यासर्वास्त्रधारिणी तथा ॥ ११ ॥ अनेकशस्त्रहस्ताचअनेकास्त्रविधारिणी ॥ कुमा रीचैवकन्याचकौमारीयुवतीयतिः ॥ १२ ॥ अप्रौढाचैवप्रौढा चवृद्धमाताबलप्रदा ॥ यइदञ्चपठेत्स्तोत्रन्दुर्गानामशताष्टकम् ॥ १३ ॥ नासाध्याँव्वैद्यतेदेवित्रिषुलोकेषुपार्व्वति ॥ धनन्धा न्यंसुताञ्चायांहयंहस्तिनमेवच ॥ १४ ॥ चतुर्व्वर्गन्तथाचान्ते लभेन्मुक्तिञ्चशाश्वतीम् ॥ कुमारीꣳपूजयित्वाचध्यात्वादेवींसुरे श्वरीम् ॥ १५ ॥ पूजयेत्परयाभक्त्यापठेन्नामशताष्टकम् ॥ तस्य सिद्धिर्भवेद्देविसर्वैःसुरवरैरपि ॥ राजानोदासतांयान्तिराज्यश्रि यमवाप्नुयात् ॥ १६ ॥ गोरोचनालक्तककुङ्कुमेन सिन्दूरकर्प्पूरमधु त्रयेण ॥ विलिख्ययन्त्रँव्विधिनाविधिज्ञो भवेत्सदाधारयतापुरा रिः॥ १७॥ भौमावास्यानिशाभागेचन्द्रेशतभिषाङ्गते॥ विलिख्यप्र पठंस्तोत्रंसभवेत्सम्पदाम्पदम्॥ १८॥ इतिशतनामाष्टोत्तरशतम्॥

अथसहस्रनाम।

॥ श्रीदेव्युवाच ॥ ममनामसहस्रञ्चशिवपूर्व्वविनिर्म्मितम् ॥ तत्पठ्यताँव्विधानेनतदासर्व्वम्भविष्यति ॥ १ ॥ इत्युक्तापार्व तीदेवीश्रावयामासतच्चतान् ॥ तदेवनामसाहस्रन्दकारादिवरा ननें ॥ २ ॥ रोगदारिद्र्यदौर्भाग्यशोकदुःखविनाशकम् ॥ सर्वा सांपूजितन्नामश्रीदुर्गादेवतामता ॥ ३ ॥ निजवीजम्भवेद्बीजं

मन्त्रङ्कीलकमुच्यते ॥ सर्वाशापूरणेदेवीविनियोगःप्रकीर्त्तितः ॥ ॥ ४॥ दुन्दुर्ग्गादुर्ग्गतिहरादुर्ग्गाजलनिवासिनी॥ दुर्ग्गमार्ग्गानुसञ्चारादुर्ग्गमार्ग्गनिवासिनी ॥ ५ ॥ दुर्ग्गमार्ग्गप्रविष्टाचदुर्ग्गमार्ग्गप्रवेशिनी ॥ दुर्ग्गमार्ग्गकृतावासादुर्ग्गमार्ग्गजयप्रिया ॥ ६ ॥ दुर्ग्गमार्ग्गगृहीतार्च्चादुर्ग्गमार्ग्गस्थितात्मिका ॥ दुर्ग्गमार्ग्गस्तुतिपरा दुर्ग्गमार्ग्गस्मृतिपरा ॥ ७ ॥ दुर्ग्गमार्ग्गसदास्थालीदुर्ग्गमार्ग्गरतिप्रिया ॥ दुर्ग्गमार्ग्गस्थलस्थानादुर्ग्गमार्ग्गविलासिनी ॥ ८ ॥ दुर्ग्गमार्ग्गत्यक्तवस्त्रादुर्ग्गमार्ग्गप्रवर्त्तिनी ॥ दुर्ग्गासुरनिहन्त्रीचदुर्गासुरनिषूदिनी ॥ ९ ॥ दुर्ग्गासुरहरादूतीदुर्ग्गासुरविनाशिनी ॥ दुर्ग्गासुरवधोन्मत्तादुर्ग्गासुरवधोत्सुका ॥ ॥ १० ॥ दुर्ग्गासुरवधोत्साहादुर्ग्गासुरवधोद्यता ॥ दुर्ग्गासुरवधप्रेप्सुर्दुर्ग्गासुरमखान्तकृत् ॥ ११ ॥ दुर्ग्गासुरध्वंसतोषा दुर्ग्गदानवदारिणी ॥ दुर्ग्गविद्रावणकरीदुर्ग्गविद्रावणीसदा ॥ ॥ १२ ॥ दुर्ग्गविक्षोभनकरीदुर्ग्गशीर्षनिकृन्तनी ॥ दुर्ग्गविध्वंसनकरीदुर्ग्गदैत्यनिकृन्तनी ॥ १३ ॥ दुर्ग्गदैत्यप्राणहरादुर्ग्गदैत्यान्तकारिणी॥दुर्ग्गदैत्यहरत्रातादुर्ग्गदैत्यसृग्गुन्मदा ॥ १४ ॥ दुर्ग्गदैत्याशनकरीदुर्ग्गचर्म्माम्बरावृता ॥ दुर्ग्गयुद्धोत्सवकरी दुर्ग्गयुद्धविशारदा ॥ १५ ॥ दुर्ग्गयुद्धासवरतादुर्ग्गयुद्धविमर्द्दिनी ॥ दुर्ग्गयुद्धहास्यरतादुर्ग्गयुद्धाट्टहासिनी ॥ १६ ॥ दुर्ग्गयुद्धमहामत्तादुर्ग्गयुद्धानुसारिणी ॥ दुर्ग्गयुद्धोत्सवोत्साहादुर्ग्गदेशनिषेविणी ॥ १७ ॥ दुर्ग्गदेशवासरतादुर्ग्गदेशविलासिनी ॥ दुर्ग्गदेशार्च्चनरतादुर्ग्गदेशजनप्रिया ॥ १८ ॥ दुर्ग्गमस्थानसंस्थानादुर्ग्गमध्यानसाधना ॥ दुर्ग्गमादुर्ग्गमध्यानादुर्ग्गमात्मस्वरूपिणी ॥ १९ ॥ दुर्ग्गमागमसन्धानादुर्ग्गमागमसंस्तुता ॥ दुर्ग्गमागमदुर्ज्ञेयादुर्ग्गमश्रुतिसम्मता ॥ २० ॥ दुर्ग्गमश्रुतिमा

न्याच दुर्गमश्रुतिपूजिता ॥ दुर्गमश्रुतिसुप्रीतादुर्गमश्रुतिहर्षदा ॥ २१ ॥ दुर्गमश्रुतिसंस्थानादुर्गमश्रुतिमानिता ॥ दुर्गमाचारसन्तुष्टादुर्गमाचारतोषिता ॥ २२ ॥ दुर्गमाचारनिर्व्वृत्तादुर्गमाचारपूजिता ॥ दुर्गमाचारकसितादुर्गमस्थानदायिनी ॥ २३ ॥ दुर्गमप्रेमनिरता दुर्गमद्रविणप्रदा ॥ दुर्गमाम्बुजमध्यस्थादुर्गमाम्बुजवासिनी ॥ २४ ॥ दुर्गनाडीमार्ग्गगतिर्दुर्गनाडीप्रचारिणी ॥ दुर्गनाडीपद्मरतादुर्गनाड्यम्बुजस्थिता ॥ २५ ॥ दुर्गनाडीगतायातादुर्गनाडीकृतास्पदा ॥ दुर्गनाडीरतरतादुर्गनाडीशसँस्तुता ॥ २६ ॥ दुर्गनाडीश्वररतादुर्गनाडीशचुम्बिता ॥ दुर्गनाडीशक्रोडस्थादुर्गनाडयुत्थितोत्सुका ॥ २७ ॥ दुर्गनाड्यारोहणाचदुर्गनाडीनिषेविता ॥ दरीस्थानदरीस्थानवासिनीदनुजान्तकृत् ॥ २८ ॥ दरीकृततपस्याचदरीकृतहरार्च्चना ॥ दरीजापितदिष्टाचदरीकृतरतिक्रिया ॥ २९ ॥ दरीकृतहरार्हाचदरीक्रीडितपुत्रिका ॥ दरीसन्दर्शनरतादरीरोपितवृश्चिका ॥ ३० ॥ दरीगुप्तिकौतुकाढ्यादरीभ्रमणतत्परा ॥ दनुजान्तकरीदीनादनुसन्तानदारिणी ॥ ॥ ३१ ॥ दनुजध्वंसिनीदूनादनुजेन्द्रविनाशिनी ॥ दानवध्वंसिनीदेवीदानवानाम्भयङ्करी ॥ ३२ ॥ दानवीदानवाराध्यादानवेन्द्रवरप्रदा ॥ दानवेन्द्रनिहन्त्रीचदानवद्वेषिणीसती ॥ ३३ ॥ दानवारिप्रेमरतादानवारिप्रपूजिता ॥ दानवारिकृतार्च्चाचदानवारिविभूतिदा ॥ ३४ ॥ दानवारिमहानन्दादानवारिरतिप्रिया ॥ दानवारिदानरतादानवारिकृतास्पदा ॥ ३५ ॥ दानवारिस्तुतिरतादानवारिस्मृतिप्रिया ॥ दानवार्य्याहाररतादानवारिप्रबोधिनी ॥ ३६ ॥ दानवारिधृतप्रेमादु४खशोकविमोचनी ॥ ४खहन्त्रीदु४खदात्रीदु४खनिर्म्मूलकारिणी ॥ ३७ ॥ दु४खनि

र्म्मूलनकरीदुःखदार्य्यरिनाशिनी ॥ दुःखहरादुःखनाशादुःख ग्रामादुरा[illegible]॥३८॥दुःखहीनादुःखधाराद्रविणाचारदायिनी॥ द्रविणोत्सर्गसन्तुष्टाद्रविणत्यागतोषिका ॥ ३९ ॥ द्रविणस्प र्शसन्तुष्टाद्रविणस्पर्शमानदा ॥द्रविणस्पर्शहर्षाढ्याद्रविणस्प र्शतुष्टिदा ॥ ४० ॥ द्रविणस्पर्शनकरीद्रविणस्पर्शनातुरा ॥ द्रविणस्पर्शनोत्साहाद्रविणस्पर्शसाधिता॥ ४१ ॥ द्रविणस्पर्श नमताद्रविणस्पर्शपुत्रिका ॥ द्रविणस्पर्शरक्षिणीद्रविणस्तोम दायिनी ॥४२॥ द्रविणाकर्षणकरीद्रविणौघविसर्जनी ॥ द्रविणा चलदानाढ्याद्रविणाचलवासिनी ॥४३॥ दीनमातादीनवन्धुर्दी नविघ्नविनाशिनी ॥ दीनसेव्यादीनसिद्धादीनसाध्यादिगम्बरी ॥ ४४॥ दीनगेहकृतानन्दादीनगेहविलासिनी॥दीनभावप्रेमरता दीनभावविनोदिनी ॥ ४५॥ दीनमानवचेतःस्थादीनमानवहर्ष दा॥दीनदैन्यनिघातेच्छुर्दीनद्रविणदायिनी॥ ४६ ॥ दीनसाधन सन्तुष्टादीनदर्शनदायिनी ॥ दीनपुत्रादिदात्रीचदीनसम्पद्विधा यिनी ॥ ४७ ॥ दत्तात्रेयध्यानरतादत्तात्रेयप्रपूजिता ॥ दत्ता त्रेयर्षिसंसिद्धादत्तात्रेयविभाविता ॥४८ ॥ दत्तात्रेयकृतार्हाचद त्तात्रेयप्रसाधिता ॥ दत्तात्रेयहर्षदात्रीदत्तात्रेयसुखप्रदा ॥ ४९ ॥ दत्तात्रेयस्तुताचैवदत्तात्रेयनुतासदा ॥ दत्तात्रेयप्रेमरतादत्तात्रेया नुमानिता ॥ ५० ॥ दत्तात्रेयसमुद्गीतादत्तात्रेयकुटुम्बिनी ॥ द त्तात्रेयप्राणतुल्यादत्तात्रेयशरीरिणी ॥ ५१ ॥ दत्तात्रेयकृतान न्दादत्तात्रेयांशसम्भवा ॥ दत्तात्रेयविभूतिस्थादत्तात्रेयानुसारि णी ॥ ५२ ॥ दत्तात्रेयगीतिरतादत्तात्रेयधनप्रदा॥दत्तात्रेयदुः खहरादत्तात्रेयवरप्रदा ॥ ५३ ॥ दत्तात्रेयज्ञानदात्रीदत्तात्रेयभया पहा॥देवकन्यादेवमान्यादेवदुःखविनाशिनी॥ ५४ ॥ देवसिद्धा देवपूज्यादेवेज्यादेववन्दिता ॥ देवमान्यादेवधन्यादेवविघ्नविना

शिनी ॥ ५५ ॥ देवरम्यादेवरतादेवकौतुकतत्परा ॥ देवक्रीडादेवव्रीडादेववैरिविनाशिनी ॥ ५६ ॥ देवकामादेवरामादेवद्विष्टविनाशिनी ॥ देवदेवप्रियादेवीदेवदानववन्दिता ॥ ५७ ॥ देवदेवरतानन्दादेवदेववरोत्सुका ॥ देवदेवप्रेमरतादेवदेवप्रियम्वदा ॥ ५८ ॥ देवदेवप्राणतुल्यादेवदेवनितम्बिनी ॥ देवदेवहृत्तमनादेवदेवसुखावहा ॥ ५९ ॥ देवदेवक्रोडरतादेवदेवसुखप्रदा ॥ देवदेवमहानन्दादेवदेवप्रचुम्बिता ॥ ६० ॥ देवदेवोपभुक्ताच देवदेवानुसेविता ॥ देवदेवगतप्राणादेवदेवगतात्मिका ॥ ६१ ॥ देवदेवहर्ष्षदात्रीदेवदेवसुखप्रदा ॥ देवदेवमहानन्दादेवदेवविलासिनी ॥ ६२ ॥ देवदेवधर्म्मपत्नीदेवदेवमनोगता ॥ देवदेववधूर्देवदेवदेवार्च्चनप्रिया ॥ ६३ ॥ देवदेवाङ्कनिलयादेवदेवाङ्कशायिनी ॥ देवदेवाङ्गसुखिनीदेवदेवाङ्गवासिनी ॥ ६४ ॥ देवदेवाङ्गभूषाचदेवदेवाङ्गभूषणा ॥ देवदेवप्रियकरीदेवदेवाप्रियान्तकृत् ॥ ॥ ६५ ॥ देवदेवप्रियप्राणादेवदेवप्रियात्मिका॥ देवदेवार्च्चकप्राणा देवदेवार्च्चकप्रिया ॥ ६६ ॥ देवदेवार्च्चकोत्साहादेवदेवार्च्चकप्रिया ॥ देवदेवार्च्चकाविघ्नादेवदेवप्रसूरपि ॥ ६७ ॥ देवदेवस्यजननीदेवदेवविधायिनी ॥ देवदेवस्यरमणीदेवदेवहृदाश्रया ॥ ॥ ६८ ॥ देवदेवेष्टदेवीचदेवतापसपातिनी ॥ देवताभावसन्तुष्टादेवताभावतोषिता ॥ ६९ ॥ देवताभाववरदादेवताभावसिद्धिदा ॥ देवताभावसंसिद्धादेवताभावसम्भवा ॥ ७० ॥ देवताभावसुखिनीदैवताभाववन्दिता ॥ देवताभावसुप्रीतादेवताभावहर्ष्षदा ॥ ७१ ॥ देवताविघ्नहन्त्रीचदेवताद्विष्टनाशिनी ॥ देवतापूजितपदादेवताप्रेमतोषिता ॥ ७२ ॥ देवतागारनिलयादेवतासौख्यदायिनी ॥ देवतानिजभावाचदेवताहृतमानसा ॥ ॥ ७३ ॥ देवताकृतपादार्च्चादेवताहृतभक्तिका ॥ देवतागर्व्वम

ध्यस्थादेवतादेवतादनुः ॥ ७४ ॥ दुन्दुर्गायैनमोनाम्नीदूंफट्म न्त्रस्वरूपिणी ॥ दूंनमोमन्त्ररूपाचदूंनमोमूर्त्तिकात्मिका ॥ ॥ ७५ ॥ दूरदर्शिप्रियादुष्टादुष्टभूतनिषेविता ॥ दूरदर्शिप्रेमर तादूरदर्शिप्रियव्वंदा ॥ ७६ ॥ दूरदर्शिसिद्धिदात्रीदूरदर्शिप्र तोषिता ॥ दूरदर्शिकण्ठसंस्थादूरदर्शिप्रहर्षिता ॥ ७७ ॥ दूर दर्शिगृहीतार्च्चादूरदर्शिप्रतार्प्पिता ॥ दूरदर्शिप्राणतुल्यादूरद र्शिसुखप्रदा ॥ ७८ ॥दूरदर्शिभ्रान्तिहरादूरदर्शिहृदास्पदा ॥ दूरदर्श्यरिविद्रावादीर्घदर्शिप्रमोदिनी ॥ ७९ ॥ दीर्घदर्शि प्राणतुल्यादीर्घदर्शिवरप्रदा ॥ दीर्घदर्शिहर्षदात्रीदीर्घद र्शिप्रहर्षिता ॥ ८० ॥ दीर्घदर्शिमहानन्दादीर्घदर्शिगृहालया ॥ दीर्घदर्शिगृहीतार्च्चादीर्घदर्शिहृतार्हणा ॥ ॥ ८१ ॥ दयादानवतीदात्रीदयालुर्दीनवत्सला ॥ दयार्द्राचद याशीलादयाढ्याचदयात्मिका ॥ ८२ ॥ दयाम्बुधिर्दयासारद यासागरपारगा ॥ दयासिन्धुर्दयाभारादयावत्करुणाकरी ॥ ॥ ८३ ॥ दयावद्वत्सलादेवीदयादानरतासदा ॥ दयावद्भक्तिसु खिनीदयावत्परितोषिता ॥ ८४ ॥ दयावत्स्नेहनिरतादयावत्प्र तिपादिका ॥ दयावत्त्राणकर्त्रीचदयावन्मुक्तिदायिनी ॥ ८५ ॥ दयावद्भावसन्तुष्टादयावत्परितोषिता ॥ दयावत्तारणपरादयाव त्सिद्धिदायिनी ॥ ८६ ॥ दयावत्पुत्रवद्भावादयावत्पुत्ररूपिणी ॥ दयावद्देहनिलयादयावन्धुदयाश्रया ॥ ८७ ॥ दयालुवात्स ल्यकरीदयालुसिद्धिदायिनी ॥ दयालुशरणासक्तादयालुदेहम न्दिरा ॥ ८८ ॥ दयालुभक्तिभावस्थादयालुप्राणरूपिणी ॥ द यालुसुखदादम्भादयालुप्रेमवर्षिणी ॥ ८९ ॥दयालुवशगादीर्घा दीर्घाङ्गीदीर्घलोचना॥ दीर्घनेत्रादीर्घचक्षुर्दीर्घबाहुलतात्मि का॥९०॥दीर्घकेशीदीर्घमुखीदीर्घघोणाचदारुणा ॥दारुणासु

रहन्त्रीचदारुणासुरदारिणी ॥ ९१ ॥ दारुणाहवकर्त्रीचदारु णाहवहर्षिता ॥ दारुणाहवहोमाढ्यादारुणाचलनाशिनी ॥ ॥ ९२ ॥ दारुणाचारनिरतादारुणोत्सवहर्षिता ॥ दारुणोद्यत रूपाचदारुणारिनिवारिणी ॥ ९३ ॥ दारुणेक्षणसंयुक्तादो श्चतुष्कविराजिता ॥ दशदोष्कादशभुजादशबाहुविराजिता ॥ ॥ ९४ ॥ दशास्त्रधारिणीदेवीदशदिक्ख्यातविक्रमा ॥ दशरथा र्च्चितपदादाशरथिप्रियासदा ॥ ९५ ॥ दाशरथिप्रेमतुष्टादाश रथिरतिप्रिया ॥ दाशरथिप्रियकरीदाशरथिप्रियवंदा ॥ ९६ ॥ दाशरथीष्टसन्दात्रीदाशरथीष्टदेवता ॥ दाशरथिद्वेषिनाशादाश रथ्यानुकूल्यदा ॥ ९७ ॥ दाशरथिप्रियतमादाशरथिप्रपूजिता ॥ दशाननारिसम्पूज्यादशाननारिदेवता ॥ ९८ ॥ दशाननारि प्रमदादशाननारिजन्मभूः ॥ दशाननारिरतिदादशाननारिसेवि ता ॥ ९९ ॥ दशाननारिसुखदादशाननारिवैरिहृत् ॥ दशान नारीष्टदेवीदशग्रीवारिवन्दिता ॥ १०० ॥ दशग्रीवारिजननी दशग्रीवारिभाविनी ॥ दशग्रीवारिसहितादशग्रीवसभाजिता ॥ ॥ १०१ ॥ दशग्रीवारिरमणीदशग्रीववधूरपि ॥ दशग्रीवनाशक र्त्रीदशग्रीववरप्रदा ॥ १०२ ॥ दशग्रीवपुरस्थाचदशग्रीववधोत्सु का ॥ दशग्रीवप्रीतिदात्रीदशग्रीवविनाशिनी ॥१०३॥ दशग्रीवा हवकरीदशग्रीवानपायिनी ॥ दशग्रीवप्रियावन्द्यादशग्रीवार्हता तथा ॥ १०४ ॥ दशग्रीवाहितकरीदशग्रीवेश्वरप्रिया ॥ दशग्रीवे श्वरप्राणादशग्रीववरप्रदा ॥ १०५ ॥ दशग्रीवेश्वररतादशवर्ष्मीय कन्यका ॥ दशवर्ष्मीयबालाचदशवर्ष्मीयवासिनी ॥१०६॥ दश पापहरादम्यादशहस्तविभूषिता ॥ दशशस्त्रलसद्दोष्कादशदिक्पा लवन्दिता ॥ १०७ ॥ दशावतारूपाचदशावतारूपिणी ॥ दशविद्याभिन्नदेवीदशप्राणस्वरूपिणी ॥ १०८ ॥ दशविद्या

स्वरूपाचदशविद्यामयीतथा ॥ दक्स्वरूपादक्प्रदात्रीदृग्रूपा दक्प्रकाशिनी ॥ १०९ ॥ दिगन्तरादिगन्तस्स्थादिगम्बरविलासिनी ॥ दिगम्बरसमाजस्थादिगम्बरप्रपूजिता ॥ ११० ॥ दिगम्बरसहचरीदिगम्बरकृतास्पदा ॥ दिगम्बरहृताचित्तादिगम्बरकथाप्रिया ॥ १११ ॥ दिगम्बरगुणरतादिगम्बरस्वरूपिणी ॥ दिगम्बराशिरोधार्य्यादिगम्बरहृताश्रया ॥ ११२ ॥ दिगम्बरप्रेमरतादिगम्बररतातुरा ॥ दिगम्बरीस्वरूपाचदिगम्बरीगणार्च्चिता ॥ ११३ ॥ दिगम्बरीगणप्राणादिगम्बरीगणप्रिया ॥ दिगम्बरीगणाराध्यादिगम्बरगणेश्वरी॥ ११४ ॥ दिगम्बरगणस्पर्शामदिरापानविह्वला ॥ दिगम्बरीकोटिवृतादिगम्बरीगणावृता ॥ ॥ ११५ ॥ दुरन्तादुष्कृतिहरादुर्ध्येयादुरतिक्रमा ॥ दुरन्तदानवद्वेष्टीदुरन्तदनुजान्तकृत् ॥ ११६ ॥ दुरन्तपापहन्त्रीचदस्रनिस्तारकारिणी ॥ दस्रमानससंस्थानादस्रज्ञानविवर्द्धिनी ॥११७॥ दस्रसम्भोगजननीदस्रसम्भोगदायिनी ॥ दस्रसम्भोगभवनादस्रविद्याविधायिनी ॥११८॥ दस्रोद्वेगहरादस्रजननीदस्रसुन्दरी ॥ दस्रभक्तिविधाज्ञानादस्रद्विष्टविनाशिनी ॥ ११९ ॥ दस्रापकारदमनीदस्रसिद्धिविधायिनी ॥ दस्रतारााधिताचदस्रमातुप्रपूजिता ॥ १२० ॥ दस्रदैन्यहराचैवदस्रतातनिषेविता ॥ दस्रपितृशतज्योतिर्दस्रकौशलदायिनी ॥ १२१ ॥ दशशीर्ष्णारिसहितादशशीर्ष्णारिकामिनी ॥ दशशीर्ष्णपुरीदेवीदशशीर्ष्णसभाजिता ॥ ॥१२२॥दशशीर्ष्णारिसुप्रीतादशशीर्ष्णवधूप्रिया ॥ दशशीर्ष्णशिरश्छेत्रीदशशीर्ष्णनितम्बिनी ॥ १२३ ॥ दशशीर्ष्णहरप्राणादशशीर्ष्णहरात्मिका ॥ दशशीर्ष्णहराराध्यादशशीर्ष्णारिवन्दिता ॥ ॥ १२४ ॥ दशशीर्ष्णारिसुखदादशशीर्ष्णकपालिनी॥ दशशीर्ष्णज्ञानदात्रीदशशीर्ष्णरिदेहिता ॥ १२५ ॥ दशशीर्षवधोपात्तश्री

रामचन्द्ररूपता ॥ दशशीर्षराष्ट्रदेवीदशशीर्षारिसारिणी ॥ ॥ १२६ ॥ दशशीर्षभ्रातृतुष्टादशशीर्षवधूप्रिया ॥ दशशीर्षवधूप्राणादशशीर्षवधूरता ॥ १२७ ॥ दैत्यगुरुरतासाध्वीदैत्यगुरुप्रपूजिता ॥ दैत्यगुरूपदेष्ट्रीचदैत्यगुरुनिषेविता ॥ १२८ ॥ दैत्यगुरुगतप्राणादैत्यगुर्त्तापनाशिनी॥ दुरन्तदुःखशमनीदुरन्तदमनीतमी ॥ १२९ ॥ दुरन्तशोकशमनीदुरन्तरोगनाशिनी ॥ दुरन्तवैरिदमनीदुरन्तदैत्यनाशिनी ॥१३०॥ दुरन्तकलुषघ्नीचदुःकृतिस्तोमनाशिनी ॥ दुराशयादुराधारादुर्ज्जयादुष्टकामिनी ॥१३१॥ दर्शनीयाचदृश्याचदृश्याचदृष्टिगोचरा ॥ दूतीयागप्रियादूतीदूतीयागकरप्रिया ॥१३२॥ दूतीयागकरानन्दादूतीयागसुखप्रदा॥ दूतीयागकरायातादूतीयागप्रमोदिनी ॥ १३३ ॥ दुर्व्वासःपजिताचैवदूर्वासोमुनिभाविता ॥ दुर्व्वासोर्च्चितपादाचदुर्व्वासोमुनिभाविता ॥ १३४ ॥ दुर्व्वासोमुनिवन्द्याचदुर्व्वासोमुनिदेवता ॥ दुर्व्वासोमुनिमाताचदुर्व्वासोमुनिसिद्धिदा ॥ १३५ ॥ दुर्व्वासोमुनिभावस्थादुर्व्वासोमुनिसेविता ॥ दुर्व्वासोमुनिचित्तस्थादुर्व्वासोमुनिमण्डिता ॥ १३६ ॥ दुर्व्वासोमुनिसञ्चारादुर्व्वासोहृदयङ्गमा ॥ दुर्व्वासोहृदयाराध्यादुर्व्वासोहृत्सरोजगा ॥ १३७ ॥ दुर्व्वासस्तापसाराध्यादुर्व्वासस्तापसाश्रया ॥ दुर्व्वासस्तापसरतादुर्व्वासस्तापसेश्वरी ॥ १३८ ॥ दुर्व्वासोमुनिकन्याचदुर्व्वासोद्भूतसिद्धिदा ॥ दररात्रीदरहरादरयुक्तादरापहा ॥ १३९ ॥ दरघ्नीदरहन्त्रीचदरयुक्तादराश्रया ॥ १४० ॥ दरस्मेरादरापाङ्गीदयादात्रीदयाश्रया ॥ दस्रपूज्या दस्रमातादस्रदेवीदरोन्मदा ॥ १४१ ॥ दस्रसिद्धादस्रसंस्थादस्रतापविमोचिनी ॥ दस्रक्षोभहरानित्यादस्रलोकगतात्मिका ॥ ॥ १४२ ॥ दैत्यगुर्व्वङ्गनावन्द्यादैत्यगुर्व्वङ्गनाप्रिया ॥ दैत्यगुर्व्व

ङ्गनासिद्धादैत्यगुर्व्वङ्गनोत्सुका ॥ १४३ ॥ दैत्यगुरुप्रियतमा दैत्यगुरुनिषेविता ॥ देवगुरुप्रसूरूपादेवगुरुकृतार्हणा ॥ १४४ ॥ देवगुरुप्रेमयुतादेवगुर्व्वनुमानिता ॥ देवगुरुप्रभावज्ञादेवगुरुसुख प्रदा ॥ १४५ ॥ देवगुरुज्ञानदात्रीदेवगुरुप्रमोदिनी ॥ दैत्यस्त्री गणसम्पूज्यादैत्यस्त्रीगणपूजिता ॥ १४६ ॥ दैत्यस्त्रीगणरूपाच दैत्यस्त्रीचित्तहारिणी ॥ देवस्त्रीगणपूज्याचदेवस्त्रीगणवन्दिता ॥ १४७ ॥ देवस्त्रीगणचित्तस्थादेवस्त्रीगणभूषिता ॥ देवस्त्रीग णसंसिद्धादेवस्त्रीगणतोषिता ॥ १४८ ॥ देवस्त्रीगणहस्तस्था चारुचामरवीजिता ॥ देवस्त्रीगणहस्तस्थचारुगन्धविलेपिता ॥ १४९ ॥ देवाङ्गनाधृतादर्शदृष्टचर्त्थमुखचन्द्रमा ॥ देवाङ्गनो त्सृष्टनागवल्लीदलकृतोत्सुका ॥ १५० ॥ देवस्त्रीगणहस्तस्थदीप मालाविलोकना ॥ देवस्त्रीगणहस्तस्थधूपघ्राणविनोदिनी ॥ ॥ १५१ ॥ देवनारीकरगतवासकासवपायिनी ॥ देवनारीक ङ्कतिकाकृत्तकेशनिमार्ज्जना ॥ १५२ ॥ देवनारीरुष्टचगात्रादे वनारीकृतोत्सुका ॥ देवनारीविरचितापुष्पमालाविराजिता ॥ ॥ १५३ ॥ देवनारीविचित्राङ्गीदेवस्त्रीदत्तभोजना ॥ देवस्त्रीगण गीताचदेवस्त्रीगीतसोत्सुका ॥१५४॥ देवस्त्रीनृत्यसुखिनीदेवस्त्री नृत्यदर्शिनी॥देवस्त्रीयोजितलसद्रत्नपादुपदाम्बुजा ॥ १५५ ॥ देवस्त्रीगणविस्तीर्ण्णचारुतल्पनिषेदुषी ॥ देवनारीचारुकराक लिताङ्घ्र्यादिदेहिका ॥ १५६ ॥ देवनारीकरव्यग्रतालवृन्तम रुत्सुखा ॥ देवनारीवेणुवीणानादसोत्कण्ठमानसा ॥ १५७ ॥ देवकोटिस्तुतिनुतादेवकोटिकृतार्हणा ॥ देवकोटिगीतगुणादेव कोटिकृतस्तुतिः ॥ १५८ ॥ दन्तदष्टचोद्वेगफलादेवकोलाहला कुला ॥ द्वेषरागपरित्यक्ताद्वेषरागविवर्ज्जिता ॥ १५९ ॥ दामपू ज्यादामभूपादामोदरविलासिनी ॥ दामोदरप्रेमरतादामोदरभ

गिन्यपि ॥ १६० ॥ दामोदरप्रसूर्दामोदरपत्नीपतिव्रता ॥ दामोदराभिन्नदेहादामोदररतिप्रिया ॥ १६१ ॥ दामोदराभिन्नतनुर्दामोदरकृतास्पदा ॥ दामोदरकृतप्राणादामोदरगतात्मिका ॥ ॥ १६२ ॥ दामोदरकौतुकाढ्यादामोदरकलाकला ॥ दामोदरालिङ्गिताङ्गीदामोदरकुतूहला ॥ १६३ ॥ दामोदरकृताह्लादादामोदरसुचुम्बिता ॥ दामोदरसुताकृष्टादामोदरसुखप्रदा ॥ १६४ ॥ दामोदरसहाढ्याचदामोदरसहायिनी ॥ दामोदरगुणज्ञाचदामोदरवरप्रदा ॥ १६५ ॥ दामोदरानुकूलाचदामोदरनितम्बिनी ॥ दामोदरजलक्रीडाकुशलादर्शनप्रिया ॥ १६६ ॥ दामोदरबलक्रीडात्यक्तस्वजनसौहृदा ॥ दामोदरलसद्वासकेलिकौतुकिनीतथा ॥ १६७ ॥ दामोदरभ्रातृकाचदामोदरपरायणा ॥ दामोदरधरादामोदरवैरिविनाशिनी ॥ १६८ ॥ दामोदरोपजायाचदामोदरनिमन्त्रिता ॥ दामोदरपराभूतादामोदरपराजिता ॥ १६९ ॥ दामोदरसमाक्रान्तादामोदरहताशुभा ॥ दामोदरोत्सवरतादामोदरोत्सवावहा ॥ १७० ॥ दामोदरस्तन्यदात्रीदामोदरगवेषिता ॥ दमयन्तीसिद्धिदात्रीदमयन्तीप्रसाधिता ॥ १७१ ॥ दमयन्तीष्टदेवीचदमयन्तीस्वरूपिणी ॥ दमयन्तीकृतार्च्चाचदमनर्षिपवित्रभाविता ॥ १७२ ॥ दमनर्षिप्राणतुल्यादमनर्षिस्वरूपिणी ॥ दमनर्षिस्वरूपाचदम्भपूरितविग्रहा ॥ १७३ ॥ दम्भहन्त्रीदम्भदात्रीदम्भलोकविमोहिनी ॥ दम्भशीलादम्भहरादम्भवत्परिमर्द्दिनी ॥ १७४ ॥ दम्भरूपादम्भकरीदम्भसन्तानदारिणी ॥ दत्तमोक्षादत्तधनादत्तारोग्याथदाम्भिका ॥ १७५ ॥ दत्तपुत्रादत्तदारादत्तहाराचदारिका ॥ दत्तभोगादत्तशोकादत्तहस्त्यादिवाहना ॥ १७६ ॥ दत्तमतिर्द्दत्तभार्य्यादत्तशास्त्रावबोधिका ॥ दत्तपानादत्तदानादत्तदारिद्र्यनाशिनी ॥ १७७ ॥ दत्तसौधावनी

वासादत्तस्वर्गाचदासदा ॥ दास्यतुष्टादास्यहरादासदासीशत प्रदा ॥ १७८ ॥ दाररूपादारवासादारवासिद्ददास्पदा ॥ दारवा सिजनाराध्यादारवासिजनप्रिया ॥ १७९ ॥ दारवासिविनिर्न्नी तादारवासिसमर्च्चिता ॥ दारवास्याहृतप्राणादारवास्यरिनाशि नी ॥ १८० ॥ दारवासिविघ्नहरादारवासिविमुक्तिदा ॥ दारा ग्निरूपिणीदारादारकार्य्यरिनाशिनी ॥ १८१ ॥ दम्पतीदम्प तीष्टाचदम्पतीप्राणरूपिका ॥ दम्पतिस्नेहनिरतादाम्पत्यसाध नप्रिया ॥ १८२ ॥ दाम्पत्यसुखसेनाचदाम्पत्यसुखदायिनी ॥ दम्पत्याचारनिरतादम्पत्यामोदमोदिता ॥ १८३ ॥ दम्पत्यामो दसुखिनीदाम्पत्याह्लादकारिणी ॥ दम्पतीष्टपादपद्मादाम्पत्यप्रे मरूपिणी ॥ १८४ ॥ दाम्पत्यभोगभवनादाडिमीफलभोजि नी ॥ दाडिमीफलसन्तुष्टादाडिमीफलमानसा ॥ १८५ ॥ दा डिमीवृक्षसंस्थानादाडिमीवृक्षवासिनी ॥ दाडिमीवृक्षरूपाचदा डिमीवनवासिनी ॥ १८६ ॥ दाडिमीफलसाम्योरुपयोधरविव र्ज्जिता ॥ दक्षिणादक्षिणारूपादक्षिणारूपधारिणी ॥ १८७ ॥ दक्षकन्यादक्षपुत्रीदक्षमाताचदक्षसूः ॥ दक्षगोत्रादक्षसुतादक्षय ज्ञविनाशिनी ॥ १८८ ॥ दक्षयज्ञनाशकर्त्रीदक्षयज्ञान्तकारिणी॥ दक्षप्रसूतिर्दक्षेज्यादक्षवंशैकपावनी ॥ १८९ ॥ दक्षात्मजाद क्षसूनुर्दक्षजादक्षजातिका ॥ दक्षजन्मादक्षजनुर्दक्षदेहसमुद्भवा ॥ १९० ॥ दक्षजानिर्दक्षयागध्वंसिनीदक्षकन्यका ॥ दक्षिणाचा रनिरतादक्षिणाचारतुष्टिदा ॥ १९१ ॥ दक्षिणाचारसंसिद्धादक्षि णाचारभाविता ॥ दक्षिणाचारसुखिनीदक्षिणाचारसाधिता ॥ ॥ १९२॥ दक्षिणाचारमोक्षात्तिर्दक्षिणाचारवन्दिता ॥ दक्षिणाचा रशरणादक्षिणाचारहर्ष्पिता ॥१९३॥ द्वारपालप्रियाद्वारवासिनी द्वारसंस्थिता ॥ द्वाररूपाद्वारसंस्थाद्वारदेशनिवासिनी ॥१९४॥

द्वारकारी द्वारधात्री दोषमात्रविवर्जिता ॥ दोषकरादोषहरा दोषराशिविनाशिनी ॥ १९५ ॥ दोषाकरविभूषाढ्यादोषाकरकपालिनी ॥ दोषाकरसहस्राभादोषाकरसमानना ॥ १९६ ॥ दोषाकरमुखीदिव्यादोषाकरकराग्रजा ॥ दोषाकरसमज्योतिर्दोषाकरसुशीलता ॥ १९७ ॥ दोषाकरश्रेणिदोषसदृशापाङ्गवीक्षणा ॥ दोषाकरेष्टदेवीचदोषाकरनिषेविता ॥ १९८ ॥ दोषाकरघ्राणरूपादोषाकरमरीचिका ॥ दोषाकरोल्लसद्भालादोषाकरसुहर्षिणी ॥ १९९ ॥ दोषाकरशिरोभूषादोषाकरवधूप्रिया ॥ दोषाकरवधूघ्राणादोषाकरवधूर्ममता ॥ २०० ॥ दोषाकरवधूप्रीतादोषाकरवधूरपि ॥ दोषापूज्यातथादोषापूजितादोषहारिणी ॥ २०१ ॥ दोषाजापमहानन्दादोषाजापपरायणा ॥ दोषापुरश्चाररतादोषापूजकपुत्रिणी ॥ २०२ ॥ दोषापूजकवात्सल्यकारिणीजगदम्बिका ॥ दोषापूजकवैरिघ्नीदोषापूजकविघ्नहृत् ॥ २०३ ॥ दोषापूजकसन्तुष्टादोषापूजकमुक्तिदा ॥ दमघ्नसूनसम्पूज्यादमपुष्पप्रियासदा ॥ २०४ ॥ दुर्य्योधनप्रपूज्याचदुःशासनसमर्चिता ॥ दण्डपाणिप्रियादण्डपाणिमातादयानिधिः ॥ २०५ ॥ दण्डपाणिसमाराध्यादण्डपाणिप्रपूजिता ॥ दण्डपाणिगृहासक्तादण्डपाणिप्रियम्वदा ॥ २०६ ॥ दण्डपाणिप्रियमतादण्डपाणिमनोहरा ॥ दण्डपाणिहृतप्राणादण्डपाणिसुसिद्धिदा ॥ २०७ ॥ दण्डपाणिपरामृष्टादण्डपाणिप्रहर्षिता ॥ दण्डपाणिविघ्नहरादण्डपाणिशिरोधृता ॥ २०८ ॥ दण्डपाणिप्राप्तचर्च्चादण्डपाण्युन्मुखीसदा ॥ दण्डपाणिप्राप्तपदादण्डपाणिवरोन्मुखी ॥ २०९ ॥ दण्डहस्तादण्डपाणिर्दण्डबाहुर्दरान्तकृत् ॥ दण्डदोष्कादण्डकरादण्डचित्तकृतास्पदा ॥ २१० ॥ दण्डविद्यादण्डिमातादण्डिखण्डकनाशिनी ॥ दण्डिप्रियादण्डिपूज्यादण्डिसन्तोषदायिनी ॥ २११ ॥ दस्युपूज्यादस्युरतादस्यु

द्रविणदायिनी॥दस्युवर्ग्गकृतार्हाचदस्युवर्ग्गविनाशिनी॥२१२॥
दस्युनिर्न्नाशिनीदस्युकुलनिर्न्नाशिनीतथा॥ दस्युप्रियकरीदस्युनृ
त्यदर्शनतत्परा ॥२१३॥ दुष्टदण्डकरीदुष्टवर्ग्गविद्राविणीतथा॥
दुष्टवर्ग्गनिग्रहार्हादूषकप्राणनाशिनी ॥ २१४ ॥ दूषकोत्तापजन
नीदूषकारीष्टकारिणी ॥ दूषकद्वेषनकरीदाहिकादहनात्मिका ॥
॥ २१५ ॥ दारकारीनिहन्त्रीचदारुकेश्वरपूजिता ॥ दारुकेश्वरमा
ताचदारुकेश्वरवन्दिता ॥ २१६ ॥ दर्भहस्तादर्भयुतादर्भकर्म्म
विवर्जिता ॥ दर्भमयीदर्भतनुर्दर्भसर्व्वस्वरूपिणी ॥२१७॥ द
र्भकर्म्माचाररतादर्भहस्तकृतार्हणा ॥ दर्भानुकूलादार्भ्यार्द
र्व्यापात्रानुदामिनी॥२१८॥दमघोषप्रपूज्याचदमघोषवरप्रदा।दम
घोषसमाराध्यादावाग्निरूपिणीतथा ॥ २१९॥ दावाग्निरूपादावा
ग्निनिर्न्नाशितमहावला ॥ दन्तदंष्ट्रासुरकलादन्तचर्च्चितहस्तिका
॥ २२०॥दन्तदंष्ट्रस्यन्दनाचदन्तनिर्न्नाशितासुरा ॥ दधिपूज्याद
धिप्रीतादधीचिवरदायिनी॥२२१॥ दधीचीष्टदेवताचदधीचिमो
क्षदायिनी ॥ दधीचिदैन्यहन्त्रीचदधीचिदरदारिणी ॥ २२२ ॥
दधीचिभक्तिसुखिनीदधीचिमुनिसेविता ॥ दधीचिज्ञानदात्रीचद
धीचिगुणदायिनी ॥ २२३ ॥ दधीचिकुलसम्भूपादधीचिभुक्ति
मुक्तिदा ॥ दधीचिकुलदेवीचदधीचिकुलदेवता ॥ २२४ ॥ दधी
चिकुलगम्याचदधीचिकुलपूजिता ॥ दधीचिसुखदात्रीचदधीचि
दीनहारिणी ॥२२५॥ दधीचिदुःखहन्त्रीचदधीचिकुलसुन्दरी ॥
दधीचिकुलसम्भूतादधीचिकुलपालिनी ॥ २२६ ॥ दधीचिदान
गम्याचदधीचिदानमानिनी ॥ दधीचिदानसन्तुष्टादधीचिदानदे
वता ॥२२७॥ दधीचिजयसम्प्रीतादधीचिजपमानसा॥दधीचिज
पपूजाढ्यादधीचिजपमालिका॥२२८॥ दधीचिजपसन्तुष्टादधी
चिजपतोषिणी॥दधीचितपसाराध्यादधीचिशुभदायिनी २२९॥

दूर्व्वादूर्व्वादलश्यामादूर्व्वादलसमद्युतिः ॥ नाम्नांसहस्रन्दुर्गायादादीनामितिकीर्त्तितम् ॥२३०॥यःपठेत्साधकाधीशःसर्व्वसिद्धीर्लभेत्तुसः॥प्रातर्म्मध्याह्नकालेच सन्ध्यायान्नियतःशुचिः॥२३१॥ तथार्द्धरात्रसमये समहेशइवापरः ॥ शक्तियुक्तोमहारात्रौमहावीरःप्रपूजयेत् ॥ २३२ ॥ महादेवीम्मकराद्यैःपञ्चभिर्द्रव्यसत्तमैः तत्पठेत्स्तुतिमिमाय्यँस्सचसिद्धिस्वरूपधृक् ॥ २३३ ॥ देवालयेश्मशानेचगङ्गातीरेनिजेगृहे ॥ वाराङ्गनागृहेचैवश्रीगुरोस्सन्निधावपि ॥ २३४ ॥ पर्व्वतेप्रान्तरेघोरे स्तोत्रमेतत्सदापठेत् ॥ दुर्गानामसहस्रंहिदुर्गापश्यतिचक्षुषा ॥ २३५ ॥ शतावर्त्तनमेतस्यपुरश्चरणमुच्यते ॥ स्तुतिसारोनिगदितःकिम्भूयःश्रोतुमिच्छसि ॥ २३६ ॥

इतिश्रीकुलार्ण्णवेदुर्गादकारादिसहस्रनामस्तोत्रंसमाप्तम्।



५५२

इति

शाक्तप्रमोदे दुर्गातन्त्रं

सम्पूर्णम् ।